# Shukayamasamvade Shivalingarchana Mahimavarnanam

# શુકયમસંવાદે શિવલિઙ્ગાર્ચનમહિમવર્ણનમ્

## Document Information

Text title : Shukayamasamvade Shivalingarchana Mahimavarnanam

File name : shivalingArchanamahimavarNanamshukayamasaMvAde.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 17| 28-114 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# શુકયમસંવાદે શિવલિઙ્ગાર્ચનમહિમવર્ણનમ્

અપારપુણ્યનિધયો યેન પુણ્યૈઃ સમાર્જિતાઃ ।
તસ્યૈવ તાવદ્વિશ્વાસઃ શિવલિઙ્ગાર્ચને યમ ॥ ૧॥

કલ્પાવસાનપર્યન્તં ધર્મૈશ્ચેત્ દિનયાપનમ્ ।
તદા કથશ્ચિદ્વિશ્વાસો જાયતે શઙ્કરાર્ચને ॥ ૨॥

સુલભં પુણ્યપુઞ્જાનાં શ્રીમૃત્યુઞ્જયપૂજનમ્ ।
અન્યેષાં દુર્લભં તાવત્ તદેવ શિવપૂજનમ્ ॥ ૩॥

સુમેરુશિખરસ્થાનાં ચન્દ્રેણ સહ સંસ્થિતિઃ ।
પાતાલવાસિનાં સા તુ દુલેભા સ્યાત્ તથા ખલુ ॥ ૪॥

અતઃ શિવારાધનેઽપિ વિઘ્નાઃ સમ્ભાવિતાસ્તતઃ ।
તત્કાર્યમપ્રમાદેન પ્રમાદે કુગતિર્ભવેત્ ॥ ૫॥

અશાઙ્કરાગારનારીનરનીરાવલોકને ।
નિમીલ્ય લોચને પશ્ચાત્ કુર્યાત્ સૂર્યવિલોકનમ્ ॥ ૬॥

અશાઙ્કરશરીરાણિ દૃષ્ટ્વા નારકિણામિતિ ।
દૃષ્ટ્વા ભાનું વિશિષ્ટશ્ચેત્ દૂરં ભાત્યપિ ધાવતિ ॥ ૭॥

શિવનેત્રત્વબુદ્ધ્યેવ કર્તવ્યં ભાનુદર્શનમ્ ।
અન્યથા ધીર્યદિ દદા પુનર્નરકમશ્નુતે ॥ ૮॥

તતઃ પરં ભસ્મનાઙ્ગ સમ્યગુદ્ધૂલ્ય સાદરમ્ ।
હરલિઙ્ગાર્ચનં કાર્યં કૃત્વા મુક્તો ભવેદઘૈઃ ॥ ૯॥

ઉદ્ધૂલિતં ભસ્મનાઙ્ગં નવમેવોપજાયતે ।
ભસ્મ પાપશરીરાણાં ભસ્મીકરણસાધનમ્ ॥ ૧૦॥

તત્પુણ્યપરિપાકેન ભસ્માઙ્ગ ઉપયાસ્યતિ ।
તસ્માદુદ્ધૂલનેનાન્યત્ નવાઙ્ગમુપજાયતે ॥ ૧૧॥

પ્રવિષ્ટા રોમકૂપેષુ શરીરસ્થેષુ કોટિશઃ ।
લિઙ્ગાનિ જનયત્યેવ તદન્તે ભૂતિમુત્તમામ્ ॥ ૧૨॥

મન્યે લિઙ્ગમયં કાયં વિભૂત્યુદ્ધૂલનાન્મમ ।
તદઙ્ગં ચરલિઙ્ગં સ્યાદુત્તઙ્ગં ચેતનાશ્રયમ્ ॥ ૧૩॥

અચેતનાનિ લિઙ્ગાનિ કાશ્મીરાદીનિ કોટિશઃ ।
સન્તિ તત્પૂજને તાવત્ ન તાવત્ ફલમશ્નુતે ॥ ૧૪॥

પ્રત્યક્ષેણ વિરૂપાક્ષશામ્ભવાકારમાશ્રિતઃ ।
ગૃહ્ણાતિ ફલમન્નં વા નીરં વા પુષ્પમેવ વા ॥ ૧૫॥

લિઙ્ગાર્ચકસ્ય મહિમા તસ્ય લિઙ્ગાર્ચનસ્ય વા ।
વેદઃ કથઞ્ચિજ્જાનાતિ ન વિજાનાતિ વા યમઃ ॥ ૧૬॥

શાઙ્કરાગ્રેસરસ્યાઙ્ગં વિભૂતિપરિવેષ્ટિતમ્ ।
દૃષ્ટ્વા ભૂતપતિસ્તાવત્ નૃત્યત્યમ્બિકયા સહ ॥ ૧૭॥

અભૂતપૂર્વમેવેદં ચરરિઙ્ગમિતિ શશ્રુતમ્ ।
શૈવાઙ્ગમુત્તમાઙ્ગં તુ તસ્ય લિઙ્ગમનુત્તમમ્ ॥ ૧૮॥

બહુદ્વયપ્રસારેણ લિઙ્ગાકારતયા પરમ્ ।
ઉત્તમાઙ્ગં દૃશ્યમાનં તસ્ય લિઙ્ગમિતિ સ્મૃતમ્ ॥ ૧૯॥

અર્પિતં ચરલિઙ્ગેષુ સાક્ષાદ્ભુક્તં મહેશ્વરઃ ।
તતઃ સ્થાવરલિઙ્ગેષુ ન તથા શિવ સન્નિધિઃ ॥ ૨૦॥

રત્નલિઙ્ગં શ્રુતિપ્રોક્તં રત્નં શામ્ભવપુઙ્ગવઃ ।
અતસ્તદાત્મકં લિઙ્ગ લિઙ્ગોત્તમમિતિ સ્મૃતમ્ ॥ ૨૧॥

યસ્ય શામ્ભવલિઙ્ગેષુ ન ભક્તિરુપજાયતે ।
તેન સ્થાવરલિઙ્ગેષુ પૂજા કાર્યા પ્રયત્નતઃ ॥ ૨૨॥

સ્થાવરસ્યાપિ લિઙ્ગસ્ય પૂજાં કૃત્વા તતઃ પરમ્ ।
તદર્પિતોપહારેણ કર્તવ્ય હારતોષણમ્ ॥ ૨૩॥

ભુઙ્ક્તે હારમુખં પ્રાપ્ય સદારો હર ઇત્યપિ ।
શ્રુતિઃ શ્રુતા તતો હારં હારા હારોદરં વિદુઃ ॥ ૨૪॥

હારમાહારમાસ્વાદ્ય હારોઽપિ હરતામિયાત્ ।
તતો હારો હરઃ સાક્ષાત્ તદા હારોદરં ચ સઃ ॥ ૨૫॥

યેષાં ન હારરૂપેણ લિઙ્ગેષુ ન દૃઢા મતિઃ ।
તેનાર્ચનીયં તલ્લિઙ્ગં સ્થાવરં ગિરિગહ્વરે ॥ ૨૬॥

હારાન્તઃકરણાકારગુહામાશ્રિત્ય શઙ્કરઃ ।
તિષ્ઠતીત્યવગન્તવ્યં સા ગુહા વેદબોધિતા ॥ ૨૭॥

તસ્યાં ગુહાયાં સંવિષ્ટમમ્બિકારમણં પ્રભુમ્ ।
સ્મૃત્વા હર્ષાશ્રુધારાભિઃ ધીરો હારોऽમૃતો ભવેત્ ॥ ૨૮॥

યથાધિકારં લિઙ્ગાર્ચાં કૃત્વા પાપૈર્વિમુચ્યતે ।
યથાવિભવમેતસ્ય પૂજા કાર્યા વિશેષતઃ ॥ ૨૯॥

શિવ એવ યદા ઇષ્ટઃ ચિદાનન્દઘનસ્તદા ।
તદર્ચનપરો ભૂયાત્ ન લિઙ્ગાર્ચનતત્પરઃ ॥ ૩૦॥

શિવસન્નિધિરિત્યેવ લિઙ્ગપૂજા વિધીયતે ।
સ ચેત્ સન્નિહિતઃ સાક્ષાત્ કાર્યં તસ્યૈવ પૂજનમ્ ॥ ૩૧॥

અતઃ પ્રકૃતપાપસ્ય નાશાયાપિ પ્રયત્નતઃ ।
શિવલિઙ્ગાર્ચનં કાર્યં તન્નાશસ્તેન જાયતે ॥ ૩૨॥

પાપદાવાનલસ્યાયં શિવલિઙ્ગાર્ચનામ્બુદઃ ।
વિનાશકો ભવત્યેવ સભાગ્યાનાં ભવેત્ખલુઃ ॥ ૩૩॥

અતઃ પરં કાલકાલપૂજયા કાલયાપનમ્ ।
કર્તવ્યં કાલનિલયં કાલકાલં સ્મરન્ વ્રજ ॥ ૩૪॥

-ઇત્યુક્તં તદ્વચઃ શ્ૃત્વા તત્કૃતં લિઙ્ગપૂજનમ્ ।
તત્સાધનાનિ દૃષ્ટ્વાપિ યમઃ પ્રાહ શુકં પ્રતિ ॥ ૩૫॥ -

-ધન્યોऽસિ ભાગ્યવાનેકઃ ભવાન્ લોકે શુકાધુના ।
સર્વલોકોપકારાય શિવપૂજા તવેદૃશી ॥ ૩૬॥ -

શિવપૂજાસાધનાનાં સાધનં તપસાં ફલમ્ ।
એતાવતૈવ તપસા સર્વેષાં કૃતકૃત્યતા ॥ ૩૭॥

ત્વયા જન્માર્જિતાનન્તતપોરૂપેણ કેવલમ્ ।
લિઙ્ગાર્ચનં કૃતમિદં સર્વસાધનલિદ્ધિદમ્ ॥ ૩૮॥

લોચનાનાં ફલમિદં શિવલિઙ્ગવિલોકનમ્ ।

અર્ચિતસ્યાસ્ય લિઙ્ગસ્ય દર્શનં તુ વિશેષતઃ ॥ ૩૯॥

શિવારાધનસામગ્રી દૃષ્ટા સેયં મુહુર્મુહુઃ ।
તનોતિ પરમાનન્દં સેયમત્યદ્ભુતા ખલુ ॥ ૪૦॥

ન શિવાર્ચનસામગ્રીપ્રભાવસ્યાપિ વર્ણનમ્ ।
અપારરસનાભિર્વા શક્યતે કર્તુમેકદા ॥। ૪૧॥

કલ્પિતા રચના સેયં ત્વયા શઙ્કરમન્દિરે ।
અપારતપસામેવ રચના ફલમશ્નુતે ॥ ૪૨॥

જન્મ તે સફલં માતા ધન્યા ધન્યઃ પિતા તવ ।
શામ્ભવસ્ય ત્વયા સઙ્ગાત્ ધન્ય મામપિ મન્મહે ॥ ૪૩॥

ભુવનેષુ ન કુત્રાપિ દૃષ્ટઃ શામ્ભપુઙ્ગવઃ ।
એતાદૃશઃ શિવરતો દુલભઃ ખલુ સર્વદા ॥ ૪૪॥

ધન્યં નેત્રયુગં ધન્યં ધન્યં મમ કરદ્વયમ્ ।
શિવપૂજનમામગ્રીકરણાલોકનાદરાત્ ॥ ૪૫॥

એતાદૃશમહાદેવપૂજયા પરયાઽનયા ।
ફલં શઙ્કરપાદાબ્જ મકરન્દતયા મતમ્ ॥ ૪૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શુકયમસંવાદે શિવલિઙ્ગાર્ચનવિધાનવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૧૭। ૨૮-૧૧૪ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 17. 28-114 ..

Proofread by Ruma Dewan

---

*Shukayamasamvade Shivalingarchana Mahimavarnanam*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*